# ॥ श्रीसुब्रह्मण्याष्टोत्तरशतनामावलिः २ ॥

ॐ श्रीगणेशाय नमः ।

ॐ सुब्रह्मण्याय नमः । परब्रह्मणे । शरणागतवत्सलाय ।
भक्तप्रियाय । परस्मै ज्योतिषे । कार्तिकेयाय । महामतये ।
कृपनिधये । महासेनाय । भीमाय । भीमपरक्रमाय ।
पार्वतीनन्दनाय । श्रीमते । ईशपुत्राय । महाद्युतये । एकरूपाय ।
स्वयं ज्योतिषे । अप्रमेयाय । जितेन्द्रियाय । सेनापतये नमः । (२०)

ॐ महाविष्णवे नमः । आद्यन्तरहिताय । शिवाय । अग्निगर्भाय ।
महादेवाय । तारकासुरमर्दनाय । अनादये । भगवते ।
देवाय । शरजन्मने । षडाननाय । गुहाशयाय । महातेजसे ।
लोकज्ञाय । लोकरक्षकाय । सुन्दराय । सूत्रकाराय । विशाखाय ।
परभञ्जनाय । ईशाय नमः । (४०)

ॐ खड्गधराय नमः । कर्त्रे । विश्वरूपाय । धनुर्धराय ।
ज्ञानगम्याय । दृढप्रज्ञाय । कुमाराय । कमलासनाय ।
अकल्मषाय । शक्तिधराय । सुकीर्तये । दीनरक्षकाय ।
षाण्मातुराय । सर्वगोप्त्रे । सर्वभूतदयानिधये । विश्वप्रियाय ।
विश्वेशाय । विश्वभुजे । विश्वमङ्गलाय । सर्वव्यापिने नमः । (६०)

ॐ सर्वभोक्त्रे नमः । सर्वरक्षाकराय । प्रभवे ।
कारणत्रयकर्त्रे । निर्गुणाय । क्रौञ्चदारणाय । सर्वभूताय ।
भक्तिगम्याय । भक्तेशाय । भक्तवत्सलाय । कल्पवृक्षाय ।
गह्वराय । सर्वभूताशयस्थिताय । देवगोप्त्रे । दुःखज्ञाय ।
वरदाय । वरप्रियाय । अनादिब्रह्मचारिणे । सहस्राक्षाय ।
सहस्रपदे नमः । (८०)

ॐ ज्ञानस्वरूपाय नमः । ज्ञानिने । ज्ञानदात्रे । ज्ञानदात्रे ।
सदाशिवाय । वेदान्तवेद्याय । वेदात्मने । वेदसाराय ।
विचक्षणाय । योगिने । योगप्रियाय । अनन्ताय । महारूपाय ।
बहुरूपाय । निर्विकल्पाय । निर्लेपाय । निर्विकाराय । निरञ्जनाय ।
नित्यतृप्ताय । निराहाराय । निराभासाय नमः । (१००)

ॐ निराश्रयाय नमः । अखण्डनिर्मलाय । अनन्ताय ।
चिदानन्दात्मकाय । गुहाय । चिन्मयाय । गिरीशाय ।
दण्डायुधधराय नमः । (१०८)

इति ।